दिनाङ्क :- 09.10.2026

प्रातः - 06:55

## प्रधानमन्त्री - महिलाबालविकासशिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां महिलाबालविकास-विभागीय-शिखरसम्मेलनस्य समापनसत्रे सहभागं करिष्यति। ह्यः आरब्धे अस्मिन् द्विदिवसीये सम्मेलने सर्वेषां राज्यानां महिलाबालविकासक्षेत्रैः सम्बद्धानां राजनीतिकनेतृणाम् अधिकारिणां च सहभागिता भवति। प्रधानमन्त्रिणा परिकल्पितानां विभागीयशिखरसम्मेलनानां शृङ्खलायाः इदं द्वितीयं सम्मेलनम् अस्ति। अस्य सम्मेलनस्य उद्देश्यं सहकारिसङ्घव्यवस्थायाः सुदृढीकरणम्, राष्ट्रियप्राथमिकतानां पूर्तये सामूहिकदायित्वभावनायाः प्रवर्धनम् तथा केन्द्र-राज्ययोः परस्परसहकारेण कार्यपरिणामानां त्वरितसाधनम् अस्ति। सम्मेलने चतुर्षु प्रमुखविषयेषु ध्यानं केन्द्रितम् अस्ति - पोषणम्, प्रारम्भिकशिक्षा, बालसंरक्षणं तथा महिलानां सुरक्षा सशक्तीकरणं च।

## वस्तुसेवाकरपरिषदः उपवेशनम्

वस्तुसेवाकरपरिषदा नवदिल्ल्यां सम्पन्ने स्वकीयस्य सप्तपञ्चाशत्तमे उपवेशने करदातृभ्यः अनुपालनप्रक्रियां सरलीकर्तुं विविधाः उपायाः अनुमोदिताः। एतेषु निर्णयेषु वस्तुसेवाकरव्यवस्थायाः अन्तर्गतं कराधिकारिणां निगडीकरणम्, अधिकाराणां निरसनं तथा अभियोजनस्य सीमायाः एककोटिरूप्यकेभ्यः पञ्चकोटिरूप्यकाणि यावत् वर्धनं सम्मिलिताः सन्ति। वित्तमन्त्री निर्मलासीतारमन् राष्ट्रियराजधान्यां नवदिल्ल्यां वार्ताहरान् सम्बोधयन्ती एतस्य घोषणाम् अकरोत्। प्रत्येकस्मिन् प्रकरणे दण्डस्य निर्धारणम् - सः अर्थदण्डः भवतु, कारावासः भवतु उत वा उभयम् - न्यायालयस्य विवेकाधिकाराय त्यक्ष्यते। वित्तमन्त्री उक्तवती यत् उपवेशने वस्तुसेवाकरस्य मानेषु किमपि परिवर्तनं न कृतम् तथा वर्तमानः मूल्यनिर्धारणक्रमः स्थिरः अस्ति। तया सूचितं यत् वस्तुसेवाकरपरिषदा सूचनापत्राणां प्रेषणाय कार्यसञ्चालनाय च समानमानकानां अनुशंसा कृता अस्ति।

## भारत–रियाद्

भारतेन विगतेषु कतिपयेषु दिवसेषु आभा-अन्ताराष्ट्रिय-विमानस्थानकं तथा रियादनगरे स्थितं किङ्ग-खालिद्-अन्ताराष्ट्रिय-विमानस्थानकं लक्ष्यीकृत्य जातानाम् आक्रमणानां निन्दा कृता। एतेषु आक्रमणेषु नागरिकाणां मृत्युः अभवत् तथा अनेकजनाः व्रणिताः जाताः। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् नागरिकोपयोगि-आधारभूतसंरचनां लक्ष्यीकृत्य आक्रमणं सर्वथा अस्वीकृतं वर्तते। मन्त्रालयेन उक्तं यत् भारतं मृतानां जनानां कुटुम्बेभ्यः गभीरां संवेदनां प्रकटयति। भारतं सऊदी-अरबस्य जनान् प्रशासनं च प्रति ऐक्यभावमपि प्रकटयति तथा तेषां पार्श्वे स्थातुं स्वप्रतिबद्धतां पुनः प्रतिपादयति।

विदेशमन्त्रालयस्य परामर्शः

रियादनगरे स्थितेन भारतीयदूतावासेन सऊदी-अरबदेशे निवसतां भारतीयनागरिकाणां कृते परामर्शः प्रसारितः। वर्तमानस्थितिं दृष्ट्वा भारतीयनागरिकाः सतर्काः भवेयुः, आवश्यकतायां च गृहेषु एव तिष्ठेयुः इति दूतावासेन परामर्शः दत्तः। भारतीयनागरिकाः प्रवर्तमानघटनाभिः सम्बद्धानां दृश्यश्रव्यचित्राणां वार्तानां च सामाजिकमाध्यमेषु प्रसारणं पुनःप्रसारणं च न कुर्युः इति दूतावासेन अनुरोधिताः। स्थानीयाधिकारिभिः आधिकारिकमाध्यमैः प्रसारितानां निर्देशानां पालनमपि कर्तुं तान् सूचितम्। प्रवासिभारतीय-सहायताकेन्द्रस्य अहोरात्रम् उपलब्धा दूरभाषसहायतासेवा निःशुल्कदूरभाषसङ्ख्यायां 8002471234 इत्यत्र उपलब्धा अस्ति।

क्रिकेट्

क्रिकेट्-क्रीडायां भारतम् अद्य राँचीनगरे पञ्चस्पर्धात्मिकायाः विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-शृङ्खलायाः द्वितीयस्पर्धायां वेस्टइण्डीज्दलं सम्मुखीकरिष्यति। स्पर्धा भारतीयसमयानुसारं सायं सप्तवादने आरप्स्यते। प्रथमस्पर्धायां विजयम् अधिगत्य भारतं शृङ्खलायाम् एकं विरुद्धं शून्यम् इति अन्तरालेन अग्रे अस्ति।

।। इति वार्ताः।।